## सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् । (३२/३७६६)

सप्तम्यन्तं पूर्वपदं सिद्ध शुष्क पक्व बन्ध इत्येतेषु उत्तरपदेषु प्रकृतिस्वरं भवति [1]सा चेत् सप्तमी कालान्न भवति । सांकाश्यसिद्धः, सांकाश्यसिद्धः । काम्पिल्यसिद्धः, काम्पिल्यसिद्धः । सांकाश्यकाम्पिल्यशब्दौ ण्यप्रत्ययान्तौ अन्तोदात्तौ । फिषि तु सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम्' (फि. सू. ६५) अन्तः पूर्वं [2]वा इति पठ्यते, तत्र पक्षे मध्योदात्तावपि भवतः । शुष्क – ऊकशुष्कः । निधनशुष्कः । ऊकशब्दो [3]बहुलवचनादवतेः [4]कक्प्रत्ययान्तोऽन्तोदात्तः । निधनशब्दः निधाञः [5]क्यप्रत्यये मध्योदात्तः । पक्व – कुम्भीपक्वः । [6]कलसीपक्वः । भ्राष्ट्रपक्वः । कुम्भीकलसीशब्दौ ङीषन्ताव[7]न्तोदात्तौ । भ्राष्ट्रशब्दः ष्ट्रन्प्रत्ययान्तः आद्युदात्तः । बन्ध – चक्रबन्धः । [8]चारकबन्धः । चक्रशब्दोऽन्तोदात्तः । चारकशब्दो ण्वुलन्त आद्युदात्तः । अकालात् इति किम् ? पूर्वाह्णसिद्धः । अपराह्णसिद्धः । सप्तमीस्वरः कृत्स्वरेण बाधितः पुनरयं विधीयते ॥

## परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु । (३३/३७६७)

परि प्रति उप अप [9]इत्येते पूर्वपदभूता वर्ज्यमानवाचिनि अहरवयववाचिनि रात्र्यवयववाचिनि चोत्तरपदे प्रकृति[10]स्वरा भवन्ति । परित्रिगर्तं वृष्टो देवः । परिसौवीरम् । परिसार्वसेनि । प्रति – प्रतिपूर्वाह्णम् । प्रत्यपराह्णम् । [11]प्रतिपूर्वरात्रम् । प्रत्यपररात्रम् । उप – उपपूर्वाह्णम् । उपापराह्णम् । उपपूर्वरात्रम् । उपापररात्रम् । अप – अपत्रिगर्तं वृष्टो देवः । अपसौवीरम् । अपसार्वसेनि । 'निपाता आद्युदात्ता उपसर्गाश्चाभिवर्जम्' (फि. सू. ८०) इति आद्युदात्तानि पूर्वपदानि । तत्पुरुषे बहुव्रीहौ च सिद्धत्वात् अव्ययीभावार्थोऽयमारम्भः । तत्र अपपरी वर्जने (१.४.८८/५९६) वर्तेते, इति तयोरेव वर्ज्यमानमुत्तरपदं, नेतरयोः । अहोरात्रावयवा अपि वर्ज्यमाना एव तयोर्भवन्ति इति न पृथगुदाह्रियते । वर्ज्यमानाहोरात्रावयवेषु इति किम् ? प्रत्यग्नि शलभाः पतन्ति । परिवनम् इत्यत्र 'वनं समासे' (६.२.१७८/३९१२) इत्येतद्भवति ॥

## राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु । (३४/३७६८)

राजन्यवाचिनां बहुवचनान्तानां यो द्वन्द्वोऽन्धकवृष्णिषु वर्तते तत्र पूर्वपदं प्रकृतिस्वरं भवति । श्वाफल्कचैत्रकाः । चैत्रकरोधकाः । शिनिवासुदेवाः । श्वाफल्कशब्दः चैत्रकशब्दश्च 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (४.१.११४/१११७) इति अणन्तावन्तोदात्तौ । शिनिशब्द आद्युदात्तः, स तदपत्येष्वभेदेन वर्तते । [12]राजन्य इति किम् ? द्वैप्यहैमायनाः । द्वीपे भवाः[13] इति 'द्वीपादनुसमुद्रं यञ्' (४.३.१०/१३८०) । [14]हैमेरपत्यं युवा[15] हैमायनः । अन्धकवृष्णय एते न तु राजन्याः । राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम् । एते च नाभिषिक्तवंश्याः । बहुवचनग्रहणं किम् ? सङ्कर्षणवासुदेवौ । द्वन्द्वे इति किम् ? वृष्णीनां कुमाराः वृष्णिकुमाराः । अन्धकवृष्णिषु इति किम् ? 'कुरुपञ्चालाः' (तै. ब्रा. १.८.४.२) ॥

---

1. वाक्यमिदं नास्ति फ. 2. वा नास्ति फ. 3. बहुलवचनात् नास्ति फ. 4. कप्रत्ययान्तः क, वुक्प्रत्ययान्तः ड. 5. क्विप् फ. 6. विलासीपक्वः फ. ग. ड. 7. अन्तोदात्तौ नास्ति ग. 8. चणकबन्धः फ. 9. इत्येतानि पूर्वपदप्रभृतीनि ग. 10. °स्वराणि ग. 11. प्रतिपूर्वरात्रः क. 12. राजन्यग्रहणम् क. ग. फ. 13. द्वैप्याः इत्यधिकम् ह. फ. 14. भैमेः क. ह. 15. भैमायनः क. ह.